श्रीगणेशायनमः ॥ श्रीगुरुगणपतिबटुकसारदेष्टदेवता
१ भ्योनमः ॥ प्रातःप्रभृतीसायांतंसायातंप्रातरंततः ॥ य
त्करोमिजगन्मातस्तदस्तुतवपूजनं ॥१॥ नत्वागुरुपदां
भोजंसाधकानांदहेतवे ॥ बालार्चनाविधिंवक्तेसाधकस्यो
पदेशकः ॥२॥ अथसाधकः ॥ प्रातःउत्थायसुखासनेसमु
पविश्यचमूर्ध्निसहस्रदलंकमलेस्वगुरुंध्यायेत् ॥ श्वेतं १
श्वेतविलेपमाल्यंवसनंवामेस्थैरेनरक्तोत्पलं ॥ बिभ्रत्या

प्रिययेतरेणकरसाश्लिष्टंप्रसन्नाननं ॥ हस्ताभ्यांमभयं
वरंचदधतंशंभुस्वरूपंपरं ॥ हृत्पात्रेहितलोचनौमल
युगंध्यायेस्थिरस्थंगुरुं ॥ इतिध्यात्वा ॥ मानसोपचारैः
भ्यर्च्य ॥ ततस्तोत्रमुदीरयेत् ॥ ॥ नमस्तेनाथभगवन् ॥ ॥
इत्यादिश्लोकपंचकेनस्तुत्वावक्ष्यमाणप्रकारेणहृदि
कमलेदेवतांध्यात्वा ॥ मानसोपचारैरभ्यर्च्यपठेत्
॥ अहंदेवोनचान्योस्मिब्रह्मैवाहंनशोकभाक् ॥ सच्चि

दानंदरूपोहंनिर्विकल्पःस्वभावान्॥इतिगुरुदेवतास्म
२ नामेवर्यभावयित्वाप्रार्थयेत्॥त्रैलोक्यचैतन्यमयादिदे
शक्ते हे विश्वमातर्भवदाज्ञयेव॥प्रातःसमुत्थायतव
प्रियार्थंसंसारयात्रामनुवर्तयिष्ये॥ इतिसंप्रार्थ्यभूमिं
प्रार्थयेत्॥ समुद्रमेखलेदेविपर्वतस्तनमंडले॥वि
ष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे॥ ॥इतिसं २
प्रार्थ्य॥ ॥स्वासानुसारेणभूयोपादंदत्वा॥चै

॥बहिर्निर्गत्यदेहसौचंविधायहस्तौपादौप्रक्षाल्यच
म्य॥क्लींवामदेवाय॥सर्वजनप्रियायनमः॥इ॥तदंत
काष्ठमामंत्र्य॥दंतान्संशोध्य॥मूलेनमुखप्रक्षालनं
कृत्वा॥देवतागुरुनामादिकीर्तयन्॥स्नानार्थंगच्छे
त्जलाशयंगत्वास्नानविधिनास्नात्वा॥अद्येत्यादि
श्रीबालात्रिपुराप्रीतयेस्नानाद्यहंकरिष्ये॥इतिसंक
ल्प्यःपश्चात्जलेयंत्रंविलिख्य॥क्रौंइतिअंकुशंमुद्र

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

यासूर्यमंडलान्नीत्वा ब्रह्म ॥ गंगे च यमुने चैव ॥ गोदावरी
२ सरस्वति ॥ नर्मदा सिंधु कावेरी जलेस्मिन्संनिधं कुरु ॥
तत्र देविं स्मृत्वा सलिलं तां तारुण्यं विभाव्य ॥ मूलेन त्रिम
ज्याचम्य ॥ मूलेन कुंभमुद्रया शिरः ॥ संप्रोक्ष्य तस्य लक्ष
णं यथा ॥ दक्षांगुष्ठ परांगुष्ठं क्षिप्त्वा हस्तद्वयेन तु साव
काशं श्लिष्टिकां मुखीकुर्यात्सा कुंभमुद्रिका ॥ तेनैव २
स्वदेहं त्रिधा संप्रोक्ष्य ॥ मूलेन त्रिराचम्य ॥ मूलेन श्रीबा

लां त्रिपुरां तर्पयामि ॥ त्रिः संतर्प्य मूलेन धौतवास
सी परिधाय मूलेन तिलकं वा विभूति धारणं कृत्वा ॥ वैदि
कीसंध्यां विधाय ः तांत्रिकीसंध्यां कुर्यात् ॥ तद्यथा मू
लेनाचम्य प्राणायामत्रयं कृत्वा ॥ ऋष्यादिन्यासं करादि
हृदयादि षडंगं विधाय ध्यायेत् ॥ बालां बालार्कव॰ एवं
ध्यात्वा ॥ मानसोपचारैः संपूज्य ॥ वामहस्ते जलं गृहीत्वा
॥ दक्षहस्तेन संपुटीकृत्य ॥ हं यं रं लं वं ॥ इति बीजैस्त्रिर

मंत्रगलितोदकेन दक्षहस्तेन तत्वमुद्रया मूलेन सप्तधा
४ शिरसि संप्रोक्ष्य अवशिष्टजलं दक्षहस्ते निधाय
वामनासिकयाचमिति बिजेनांतः प्रविश्य देहांतर्वर्त्तिस
मस्तकल्मषं प्रक्षाल्य एवं विचिंत्य दक्षनासिकया विरे
चनजलं कृष्णवर्णं विभाव्य पुरतो वज्रशिलायां अस्त्रमं
त्रेण आस्फालयेत् हस्तौ प्रक्षाल्य आचम्य ॥ सूर्याय अर्घं ८
दद्यात् ॥ उत्थाय ॥ ॐ मार्त्तंडभैरवाय प्रकाशशक्तिसं

हिताय इदमर्घ्यं स्वाहा ॥ इति त्रिगायत्रिं जपेत् ॥ ऐं वा
गीश्वरि विद्महे क्लीं कामेश्वरि धीमहि सौः तन्नः शक्तिः प्र
चोदयात् ॥ इति यथाशक्ति प्रजप्य गुह्येत्यादिना समर्पये
दिति ॥ एवं संध्यात्रयं कुर्यात् लोपो विद्या सतं जपेत् ॥ अ
शक्तो देवीं ध्यायन् ॥ यथाशक्ति मूलं जपेत् ॥ अथ जल
देवीं मूलेन ध्यात्वा मूलेन यथोक्तोपचारैः संपूज्य ॥ स्वहृ
दि विसर्जयेत् ॥ तत्र ह्रीं हंसः इति सूर्यदशः दिक्षु नम

स्वः स्वस्तोत्रोदिकं पठेत् ॥ यागमंडपं गच्छेत् ॥ अथोदक
५ भांडं गृहीत्वा यागमंडपमागत्य पठेत् ॥ सूर्यः सोमो यमः का
लो महाभूतानि पंच च ॥ एते शुभाशुभस्येह कर्मणो न
व साक्षिणः ॥ देवि त्वं प्राकृतं चित्तं पापाक्रांतमभून्मम
॥ तन्निःसारय चित्तान्मे पापं फट् फट् तेनमः ॥ इति मं
त्रेण पापोत्सादनं कृत्वा पादौ पाणी प्रक्षाल्याचम्य ॥ ॐ
वास्त्वाचार्यो मंडपाय नमः ॥ इति मंडपस्य पूज्यसोः ॥ अ

MEMORIAL

स्त्राय फट् ॥ इति द्वारं संप्रोक्ष्य द्वारस्य दक्षिणे ॥ धं धात्रे
नमः ॥ वामे वं विधात्रे नमः ॥ दक्षे गं गंगायै नमः ॥ वामे
यं यमुनायै नमः ॥ ऊर्ध्वे श्रां द्वारश्रियै नमः ॥ ॐ अधः दे
हे हल्यै नमः ॥ इति संपूज्य ॥ द्वारपालदेवदेवस्य द्वारं र
क्षतु यत्नतः ॥ निर्वाणविघ्नसंघातमित्याज्ञा परमेश्व
रि ॥ इति देवता आवइत्वा ॥ वामपादः पुरः सरमंतः
प्रविश्य ॥ नैऋत्यां वास्तुपुरुषाय नमः ॥ ईशानकोणे

दीपनाथाय नमः ॥ तिक्ष्णदंष्ट्र महाकाय कल्पांतदह
६ नोपम ॥ भैरवाय नमस्तुभ्यं मनुज्ञां दातुमर्हसि ॥ इति
भैरवाज्ञां गृहित्वा ॥ आसनं पूजयेत् ॥ ॐ ह्रीं आधारश
क्तिकमलासनाय नमः इत्यासनं संपूज्य ॥ पृथ्वित्वेति
आसनमंत्रमेरुपृष्ठ ऋषिः कूर्मो देवता सुतलछंदः
आसने विनियोगः पृथ्वित्वया ॥ इति मंत्रेणोपविश्य ६
आस्त्राय फट् इति तालत्रयं कृत्वा ॥ जलादिशा दक्षिणे

नरं रं रं इति मंत्रेण पश्चात् वामपादेन भूमान्त्रिघातु
त्सार्पसार्षपानविकरेच्च ॥ अपसर्पंतु ये भूता ये भूता
भूमिसंस्थिता ॥ ये भूता विघ्नकर्त्तारस्ते नश्यंतु शिवा
ज्ञया ॥ ॐ वामे गुरुभ्यो नमः दक्षे गंगणपतये नमः
॥ मध्ये श्रीबालात्रिपुरायै नमः ॥ इति नत्वा संकल्पं कु
र्यात् ॥ यथा आद्येत्यादि मम जपताथा पूजनयोग्य
ताप्राप्तये ॥ भूतशुद्धि प्राणप्रतिष्ठा अजपाजपसंकल्प

पूर्वकं अंतर्मातृकाबहिर्मातृकातथाचवात्रिपुरायाः
७ न्यासानहं करिष्ये॥ इतिसंकल्पः॥ भूतशुद्धिं कुर्यात्॥
मूलाधारात् हुंकारेण वा हंसः सोहं इति मंत्रेण कुंड
लिनिमुत्थाप्य॥ सुषुम्णामार्गेण हृदयं नीत्वा॥ तत्रस्थ
दीपकलिकाकारं॥ जीवमादाय परब्रह्मणि सह स्वक
मलैः संयोज्य शरीराकारगतं भूतगणं विशोधयेत्॥ त ७
तः पादादिजानुपर्यंतं स्थितां पृथ्वीं जान्वादिनाभि

पर्यंतं स्थित्वा॥ स्वप्सु प्रविलाप्य नाभ्यादिहृदयांतं स्थि
ते वह्नौ प्रविलाप्य॥ तं च हृदयादिभ्रूमध्यांतं स्थिते वायौ
तं च भ्रूमध्यादिब्रह्मरंध्रपर्यंतं तं च वायुमाकाशे प्रवि
लापयामि आकाशं अहंकारे प्रविलापयामि॥ अहंका
रं महत्तत्त्वे प्रविलापयामि॥ महत्तत्त्वं प्रकृतौ प्रविलाप
यामि प्रकृतौ परब्रह्मणि प्रविलाप्य॥ एवं प्रविलाप्य॥
अहं देवो न चान्यो॰ ॥१॥ इति पठेत्॥ दक्षकुक्षौ पाप

पुरुषं विचिंतयेत्॥ ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुज
८ द्वयं॥ सुरापानहृदा युक्तं गुरुतल्पकटिद्वयं॥ तत्सं
सर्गपदद्वंद्वंमंगप्रत्यंगपातकं॥ उपपातकरोमाणं
रक्तश्मश्रुविलोचनं॥ खड्गचर्मधरं पापं मंगुष्ठपरिमाण
कं॥ अधोमुखं कृष्णवर्णं दक्षकुक्षौ विचिन्तयेत्॥ यं १६
पुरकं ६४ कुंभकयं ३२ रेचकं॥ वं ३२ पुरकं लं ६४ कुं ८
भकं॥ हं १६ रेचकं एवं प्राणायामं कृत्वा॥ ततो परमा

त्मनः प्रकृतिस्तस्या महतत्वं ततोहंकारस्तस्मादाका
शं॥ तस्माद्वायुर्वायोस्तेजस्तेजसो॥ जलं जलात्प्र
थ्विति क्रमेण यथा स्थान भूतानि संस्थाप्य॥ ततो सो
हं॥ इति मंत्रेणात्मानं हृदयमानीय कुंडलिनि॥ यथा
लयं प्रापयेत्॥ स्वात्मानं चोत्तीर्णं भावयेत्॥ इति भू
तशुद्धिः॥ ततो प्राणप्रतिष्ठा॥ ह्रदि हस्तं दत्वा॥ ओं
आं ह्रीं क्रों यं रं लं वं शं षं सं हं अं क्षं सं हंसः॥ ह्रीं क्लीं हंसः

मम प्राणा इह प्राणाः ॥ ॐ आमित्यादि इह जीव इह स्थि

९ तः ॥ आमित्यादि मम सर्वेन्द्रियाणि वाङ्मनचक्षुश्रोत्र

जिह्वाघ्राणप्राणा इहैवागत्यं सुखं चिरं तिष्ठंतु स्वाहाः ॥

ॐ ह्रां सं हंसः क्रौं ॐ इति त्रिः पठेत् ॥ दीर्घतमा वा एणि त्रिष्टु

प् ॥ चत्वारि वाक् परिमितानि तानि विदुर्ब्राह्मणा ये म

निषिणः ॥ गुहा त्रीणी निहिता निगयंति तुरियं वाचो म ९

नुष्या वदंति ॥ ततो षोडश संस्कारार्थे षोडश प्राण वा

र् ॥ स्वहृदि जपेत् ॥ इति प्राणप्रतिष्ठा ॥ ततो अजपा

संकल्पं कुर्यात् ॥ अजपा नाम गायत्रि योगिनां मोक्षदा

यिनि ॥ तस्याः संकल्पमात्रेण नरः पापैः प्रमुच्यते ॥

हकारेण बहिर्याति सकारेण विशेत पुनः ॥ हंसः सो

हमिति मंत्रेण जीवो जपति सर्वदा ॥ षट्शतानि दिवा

रात्रौ सहस्राण्येकविंशतिः ॥ ततो मूलाधारे चतुर्दल

पद्मे वं शं षं सं बीज सहिते चतुष्कला सहिते तत्र प्राण

जलषट्शतमजपागायत्रिजपकृतेनपूर्वेघ्रुजंतेन श्रीम
१० हागणपतिप्रीयतां तस्योपरिलिंगस्थाने षड्दलपद्मे प्रा
णजलषट्सहस्रमजपागायत्रीजपकृतेन पूर्वेघ्रुजंते
न श्रीब्रह्मादेवतांप्रीयतां ॥ ततोनाभौमणिपूरकचक्रे द
शदलेनीलवर्णेप्राणजलषट्सहस्रमजपागायत्रीज
पकृतेनपूर्वेघ्रुजंतेन श्रीमहाविष्णुःप्रीयतां ॥ ततोप
रिहृदिअनाहतस्थाने द्वादशदलपद्मेप्राणजलमज

MEMORIAL

पागायत्रिजपकृतेनपूर्वेघ्रुजंतेन श्रीमाहारुद्रप्रीयतां
॥ तस्योपरिकंठस्थाने विशुद्धिपद्मे षोडशदलसहितेषो
डशकलासंहितेप्राणजलमजपागायत्रीजपकृतेन
पूर्वेघ्रुजंतेन श्रीइश्वरोदेवतां प्रीयतां ॥ तस्यापरि भ्रुमध्ये
अज्ञाचक्रे द्विदलपद्मेप्राणजलसहस्रमजपागायत्री
जपकृतेनपूर्वेघुजंतेन श्रीगुरु प्रीयंतां ॥ तस्योपरिब्र
ह्मरंध्रेसहस्रदलपद्मेशुद्धस्फुटिकसंनिभेनानाबीज

सहितेप्राणजनसहस्रमेकमजपागायत्रीजपकृतेन
११ पूर्वेघर्जनेनश्रीपरमगुरुप्रीयतां॥अजपानांम्गाय
त्रीत्रैलोक्येषुचविश्रुता॥आजपांचजपेनित्यपुनर्ज
न्मोनविद्यते॥१॥ब्रह्मानंदंपरमसुखदंकेवलंज्ञान
मूर्त्ति॥द्वंद्वातीतंत्रिगुणरहितंतत्वमस्यादिलक्ष्यं॥ए
कंनित्यंविमलमचलंसर्वदासाक्षिभूतं॥भावातीतं ३१
गगनसदृसंसद्गुरुंतंनमामि॥२॥इतिजपाजप

विधिः॥ततोअंतर्मात्रिकान्यासः॥षोडसस्वरैःपूरकं
कादिभिःपंचविंशतिवर्णैः॥८॥कुंभकंयादिभिर्दश
वर्णैःरेचकं॥एवंप्राणायामंकृत्वा॥अस्यश्रीअंत
र्मातृकान्यासस्यब्रह्मऋषिः॥गायत्रीछंदः मातृका
सरस्वतीदेवता॥हलोंबीजं॥स्वराशक्तयः ममशरी
रशुध्यर्थेन्यासेविनियोगः॥अथऋष्यादिन्यासः॥
ब्रह्मऋषयेनमःशिरसि॥गायत्रीछंदसेनमःमु

रवे॥ मातृका सरस्वती देवता नमः हृदि॥ हलो बीजाय

१२ नमो गुह्ये स्वराः शक्तये नमः पादयोः॥ मम शरीर शुद्ध्य

र्थे न्यासे विनियोगाय नमः॥ सर्वांगे॥ ॐ अं कं ५ ॐ आं अं

गुष्ठाभ्यां नमः॥ ॐ इं चं ५ ईं तर्जनीभ्यां नमः॥ ॐ उं टं ५

ऊं मध्यमाभ्यां नमः॥ ॐ एं तं ५ ऐं अनामिकाभ्यां नमः

॥ ॐ ओं पं ५ कनिष्ठकाभ्यां नमः॥ ॐ अं यं रं लं वं शं षं सं ३२

हं ळं क्षं अः करतल करपृष्ठाभ्यां नमः॥ इति करं

न्यासः॥ अथ हृदयादिन्यासः॥ ॐ अं कं ५ आं हृदयाय

नमः॥ ॐ इं चं ५ ईं शिरसे स्वाहा॥ ॐ उं टं ५ ऊं शिखायै

वषट्॥ ॐ एं तं ५ ऐं कवचाय हुं॥ ॐ ओं पं ५ औं नेत्रत्रया

य वौषट्॥ ॐ अं यं १० अः अस्त्राय फट्॥ अथ ध्यानं

आधारे लिंग नाभौ प्रकटित हृदये तालुमूले ललाटे॥

द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के॥

वासान्ते बालमध्ये डफ कठ सहिते कंठदेशे स्वराणां

हं हंतत्वार्थयुक्तं सकलदलयुतं वर्णरूपं नमामि ॥ ३ ॥

१२ अक्षस्रजं हरिणपोतमुदग्रटंकं विद्यां करैरविरतं द
धतीं त्रिनेत्रां ॥ अर्द्धेंदुमौलिमरुणामरविंदसंस्थां ॥
वर्णेश्वरीं प्रणमतस्तनभारनम्रां ॥ २ ॥ एवं ध्यात्वान्य
सेत् ॥ कंठेशोडषदलपद्मे अं नमः ॥ आं नमः ॥ इं नमः
ईं नमः उं नमः ऊं नमः ऋं नमः ॥ ॠं नमः ॥ लृं नमः ॡ १३
नमः ॥ एं नमः ऐं नमः ॥ ओं नमः औं नमः अं नमः अः

नमः ॥ ततो हृदये द्वादशदलपद्मे ॥ कं नमः खं नमः
गं नमः ॥ घं नमः ङं नमः चं नमः ॥ छं नमः जं नमः
झं नमः ॥ ञं नमः ॥ टं नमः ॥ ठं नमः ॥ ततो नाभौ मणि
पुरके द्वादशदलपद्मे ॥ डं नमः ॥ ढं नमः ॥ णं नमः
॥ तं नमः ॥ थं नमः ॥ दं नमः ॥ धं नमः ॥ नं नमः ॥ पं
नमः फं नमः ॥ ततो लिंगे षट्दलपद्मे ॥ बं नमः ॥ भं
नमः ॥ मं नमः ॥ यं नमः ॥ रं नमः ॥ लं नमः ॥ ततो

मूलाधारेचतुर्दलपद्मे॥वंनमः॥शंनमः षंनमः॥संन
१४ मः॥ततोभ्रुमध्येअज्ञाचक्रेद्विदलपद्मे॥हंक्षंनमः॥
ततोब्रह्मरंध्रेसहस्रदलपद्मे॥अंनमः॥आंनमः॥
इंनमः॥ईंनमः॥उंनमः॥ऊंनमः॥ऋंनमः॥ॠंन
म॥लृंनमः॥ॡंनमः॥एंनमः॥ऐंनमः॥ओंनमः औं
नमः॥अंनमः अःनमः॥कंनमः खंनमः॥गंनमः १४
॥घंनम॥ङं नमः॥चंनमः॥छंनमः॥जंनमः॥झं

नमः॥ञंनमः॥टंनमः॥ठंनमः॥डंनमः॥ढंनमः
णंनमः॥तंनमः॥थंनमः॥दंनमः॥धंनमः॥नंनमः
॥पंनमः॥फंनमः॥बंनमः॥भंनमः॥मंनमः॥यं
नमः॥रंनमः॥लंनमः॥वंनमः॥शंनमः॥षंनमः
संनमः॥हंनमः ळंनमः॥क्षंनमः॥इतिअंतर्मातृ
का॥ॐअस्यश्रीबहिर्मातृकामंत्रस्य॥ब्रह्माऋषिः॥
गायत्रीछंदः॥बहिर्मातृकाःसरस्वतिदेवता॥हसौं

विजानि ।। स्वराः शक्तयः ।। बिंदवः किलकं ममशरीरशु
१५ ध्यर्थे न्यासे विनियोगः ।। अथ ऋष्यादिन्यासः ।। ब्रह्मा
ऋषये नमः शिरसि ।। गायत्रि छंदसे नमः मुखे ।। वहि
र्मातृकासरस्वति देवतायै नमः हृदि ।। हलो बिजाय
नमः गुह्ये ।। स्वराः शक्तये नमः पादयोः ।। बिंदवः कि
लकेभ्यो नमः सर्वांगे ।। विनियोगाय नमः ।। करसंपु १५
टे ।। ॐ अं कं ५ आं अंगुष्ठाभ्यां नमः ।। ॐ इं चं ५ ईं तर्जनी

भ्यां नमः ।। ॐ उं टं ५ ऊं मध्यमाभ्यां नमः ।। ॐ एं तं ५ ऐं अ
नामिकाभ्यां नमः ।। ॐ ओं पं ५ औं कनिष्ठकाभ्यां नमः
।। ॐ अं यं रं लं वं १० अः करतलकरपृष्ठाभ्यां नमः ।। एवं
हृदयादि ।। ॐ अं कं ५ आं हृदयाय नमः ।। ॐ इं चं ५ ईं
शिरसे स्वाहा ।। ॐ उं टं ५ ऊं शिखायै वषट् ।। ॐ एं तं ५ ऐं क
वचाय हुं ।। ॐ ओं पं ५ औं नेत्रत्रयाय वषट् ।। ॐ अं यं १०
अः अस्त्राय फट् ।। अथ ध्यानं ।। पंचाशल्लिपिभिर्विभ

रुमुखदोयांसंधिवक्ष्मस्थलां भास्वन्मौलिनिबद्धचंद्र
१६ शकलामापीनतुंगस्तनीं ॥ मुद्राप्रक्षगुणांसुसाध्यकल
शंविद्यांचहस्तांबुजैर्बिभ्राणांविशदप्रभांत्रिनयनांवा
ग्देवतामाश्रये ॥ १ ॥ एवंध्यात्वान्यसेत् ॥ अंनमः ॥ केशां
ते ॥ आंनमोललाटे ॥ इंनमः दक्षनेत्रे ॥ ईंनमोवामने
त्रे ॥ उंनमोदक्षकर्णे ॥ ऊंनमोवामकर्णे ॥ ऋंनमोदक्ष १६
नासि ॥ ॠंनमोवामनासि ॥ लृंनमोदक्षकपोले ॥ ॡं

नमोवामकपोले ॥ एंनमः ऊर्ध्वोष्ठे ॥ ऐंनमोअधरोष्ठे
॥ ओंनमोऊर्ध्वदंतपंक्तौ ॥ औंनमोअधोदंतपंक्तौ ॥ अं
नमोजिह्वायां ॥ अः नमः कंठे ॥ कंनमोदक्षबाहुमूले
॥ खंनमोदक्षकूर्परे ॥ गंनमोदक्षमणिबंधे ॥ घंनमो
दक्षांगुलिमूले ॥ ङंनमोदक्षहस्तांगुल्यग्रे ॥ चंनमो
वामबाहुमूले ॥ अंनमोवामहस्तांगुल्यग्रे ॥ टंनमोद
क्षपादमूले ॥ ठंनमोदक्षपादजानुनि ॥ डंनमोदक्ष

१७ पादगुल्फे॥ ठं नमो दक्षपादांगुलिमूले॥ णं नमो दक्षपादांगुल्यग्रे॥ तं नमो वामपादमूले॥ थं नमो वामपादजानुनि॥ दं नमो वामपादगुल्फे॥ धं नमो वामपादांगुलिमूले॥ नं नमो वामपादांगुल्यग्रे॥ पं नमो दक्षपार्श्वे॥ फं नमो वामपार्श्वे॥ बं नमो पृष्ठे॥ भं नमो नाभौ॥ मं नमो उदरे॥ यं त्वगात्मने नमो हृदि॥ रं असृगात्मने नमो हृत्कांसे॥ लं मांसात्मने नमो ककुदि॥ वं मेदात्मने नमो

MEMORIAL

वामांसे॥ शं अस्थ्यात्मने नमो हृदयादि दक्षहस्तायातं॥ षं मज्जात्मने नमो हृदयादि वामहस्तायातं॥ सं शुक्रात्मने नमो हृदयादि दक्षपादाग्रान्तं॥ हं प्राणात्मने नमो हृदयादि वामपादाग्रान्तं॥ ळं परमात्मने नमो हृदयादि उदरान्तं॥ क्षः क्रोधात्मने नमो हृदयादिमुखांतः॥ ॐ अं आं इं ईं इत्यादि ळं क्षः पर्यन्त अनेन व्यापकं कुर्यात्॥ इति बहिर्मातृकान्यासः॥ छ॥ अथ

यं॰पु॰वि॰नवयोन्यात्मकं यंत्रं बहिरष्टदलान्वितं॥भू
१८ गृहं गुणरेखां च पूजनाय लिखेत्सुधीः॥१॥ततः प्राण
यामः॥मूलेन द्वादशवारं पूरयेत्॥चतुःषष्टिवारेण कुं
भकेन स्तंभइत्वा॥षोडशवारं रेचयेत्॥एवं त्रिवारं कु
यात्॥अथ नवयोन्यात्मकन्यासः॥ह्रीं श्रीं ऐं नमः
वामकर्णे २ क्लीं नमः दक्षिणकर्णे २ सौं नमः चुबुके २ १८
ऐं नमः वामस्कंधे २ क्लीं नमः दक्षिणस्कंधे २ सौं नमः

मुखे २ ऐं नमः वामनेत्रे २ क्लीं नमः दक्षिणनेत्रे २ सौं नमः
नासाग्रे २ ऐं नमः वामबाहुमूले २ क्लीं नमः दक्षिणबा
हुमूले २ सौं नमः उदरे २ ऐं नमः वामकूर्परे २ क्लीं नमः
दक्षिणकूर्परे २ सौं नमः लिंगे २ ऐं नमः वामपादे २ क्लीं
नमः दक्षपादे २ सौं नमः गुदे २ ऐं नमः वामपार्श्वे २
क्लीं नमः दक्षपार्श्वे २ सौं नमः हृदि २ ऐं नमः वामस्त
ने २ क्लीं नमः दक्षिणस्तने २ सौं नमः कंठे॥इति नव

शोन्यात्मकंन्यासः ॥ अथयंत्रसाधनं ॥ अस्यश्रीयंत्र
३९ शोधनमंत्रस्य ॥ सदाशिवऋषिः त्रिष्टुप्छंदः ॥ परांश
क्तिर्देवता श्रीं बीजं ॥ ह्रीं शक्तिः ॥ क्लीं कीलकं ॥ यंत्रशो
धने विनियोगः ॥ ऋष्यादिकरहृदयन्यासं कृत्वा ॥ वि
षशुद्धिः मातृकान्यासं लयागं ॥ अर्द्धनारीश्वरन्यासः
॥ मूलं त्रिखंडन्यासं कृत्वा पीठपूजा स्वहृदये कृत्वास्य ३९
ण्सिंहासने स्थाप्य षट्चक्रं भेदनं स्वष्टदेवतं शोधये

येत् ॥ कुंडगोला भवेन वा आष्टगंधेन वा देवीपोरुषेण र
सेन वा ॥ अथमंत्रः ॥ ॐ श्रीं ह्रीं ह्रीं क्लीं सोऽहं श्वरी नाना यंत्रा
लयं शोधय शोधय ठः ठः ॥ इति यंत्रशोधनं ॥ अस्यश्री
संजीवमंत्र दक्षिणामूर्तिऋषिः अनुष्टुप्छंदः बाला
अन्नरीमंत्रस्य संजीवने विनियोगः ॥ सोः क्लीं ऐं सोः
संजीवनं कुरु कुरु स्वाहा ॥ बालामंत्रेण न्यासध्यानं ॥
इति संजीवनं ॥ अस्य श्री शापविमोचनमंत्रस्य मूलप्र

कृतिरनुष्टुप् छंदः ॥ क्रीं बीजं शापविमोचने विनियोगः
२० मूलेन न्यासः ध्यानं ॥ ॐ क्रीं श्रीं ह्सौं अक्षर्याः क्रवं शाप
विमोचनं कुरु कुरु स्वाहा ॥ इति शापविमोचनं ॥ अथ
संपुटः सौंः ॥ ऐं ऐं सौं इति संपूटं ॥ अथ चक्रनिर्णयः
॥ बिंदु त्रिकोण रस कोणक नाग पत्र वृत्त त्रयां चिलय ही
सदन त्रयं च ॥ बालादिचक्रमिदमार्जिहि नरं गीगिशांब्र २०
सेंद्रविद्रुमनमातंगदितं मयाप्ति ॥ १ ॥ अथ अंतर्यागविधिः

अंतर्यागविधिं कुर्यात् ॥ स्नात्वा तन्मेस्ममयो भवेत् ॥ मू
लाधारे मूलविद्यां विद्युत्कोटिसमप्रभां ॥ १ ॥ सूर्यकोटिप्र
तीकाशां चंद्रकोटीनिभां प्रिये ॥ विशांतं तु स्वरूपां तां बिंदु
त्रवलयां प्रियां ॥ २ ॥ ऊर्ध्वशक्तिनिपातेन सहजेन वरान
ने ॥ मूलशक्तिः हठत्वेन मध्यबीजं प्रबोधतः ॥ ३ ॥ परमा
नंदसंदोहं सानंदं चिंतयेत्परां ॥ इत्यंतर्यजनं कृत्वा प
श्चात् पूजां समारभेत् ॥ ४ ॥ अथ ध्यानं ॥ मुक्तातपत्र

छायायां रक्तसिंहासने स्थितां ॥ अनर्घ्यरत्नखचितमु
२३ कुटं रत्नकुंडलां ॥५॥ ध्यायेद्देवीमहेशानीं कदंबवनम
ध्यगां ॥ रत्नमंडपमध्ये तु लसत्कल्पवनांतरे ॥६॥ पुस्त
कं चाभयं वामे दक्षिणे चाक्षमालिकां ॥ वरदानरतां दे
वीं सम्यक् सारस्वतिप्रदां ॥७॥ एवं ध्यात्वा पूजाविघ्नि
वारणार्थं ॥ अथ बटुकध्यानं ॥ करकलितकपालः २१
कुंडली दंडपाणि ॥ रक्ताकारणतिमिरनीलो व्यालयज्ञो

पवित्रं क्रतुसमयसपर्याविघ्नविच्छेदहेतुर्जयतिबटुक
नाथः सिद्धिदः साधकानां ॥१॥ एवं ध्यात्वा पूजां कुर्यात्
अथ पात्रस्थापनविधिः ॥ दक्षिणतो दीपस्थापं ॥ अ
स्मिन्स्थाने दीपनाथ विनिर्विघ्नं साधकानां सिद्धिहेतवे
॥ श्रीचक्रपुजनार्थं मनुज्ञां दातुमर्हसि ॥ इति दीपं संपू
ज्य ॥ स्ववामे चतुरस्रं कृत्वा नमः ॥ इति संपूज्य ॥ ॐ रं अ
ग्निमंडलाय ह्लौं कुलात्मने नमः ॥ श्री बालात्रिपुरसु
ह ष

द्र्याय नमः ॥ कलसाधाराय नमः ॥ इत्याधारं संस्थाप्य
२२ तदुपरि ॥ अथातो अर्घ्यविधिः ॥ ततः स्ववामभागे कल
शस्थापनं कुर्यात् ॥ आसनः पुरतो वामभागे चतुरस्त्रं
मंडलं कृत्वा ॥ तत्र यंत्रिकां संस्थाप्य ॥ यंत्रिका च त्रिकोण
चतुरस्त्रं वर्तुलाकारं भवंति ॥ तस्यां मं दशकलात्मने वह्नि
मंडलाय नमः ॥ इति संपूज्य ॥ प्रणवेन जलं पूरयेत् ॥ त
त्र जले ओं षोडशकलात्मने सोममंडलाय नमः ॥ इति

MEMORIAL

संपूज्य ॥ इति सामान्यार्घः ॥ ततः शंखस्य दक्षिणतः
त्रिकोणषट्कोणं एतं चतुरस्त्रं मंडलं विलिख्य ॥ पुष्पा
द्य घृतेन सामान्यार्घतोयेन संप्रोक्ष्य ॥ ऐं ह्रीं सौं इति त्रि
कोणं संपूज्य ॥ द्वितीयावृत्या षट्कोणेषु अस्त्रादि संपूज्य ॥
ऐं कामरूपपीठाय नमः ॥ क्लीं पूर्णगिरीपीठाय नमः सौं जा
लंधरपीठाय नमः ॥ ऐं ह्रीं सौं उड्यानपीठाय नमः ॥ इ
ति मध्ये संपूज्य ॥ कामकलां लिखित्वा यंत्रिकां संस्थाप्य

॥ तस्योमं दस कलात्मने वह्निमंडलाय नमः ॥ रां री रूं रैं
२३ रौं हः यलवरयुं रं धर्मप्रदसोमंडलाय दस कलात्मने श्री
महात्रिपुरसुंदर्याः कलसाधाराय नमः ॥ इत्याधारं
संपूज्य ॥ वामावर्त्तेन कला पूजयेत् ॥ यं धूम्रार्चि कला
श्रीपा० ३ रं उष्मा कला श्रीपादु० लं ज्वालिनी कला श्रीपा०
पु० ॥ ॐ षं सुश्री कला श्रीपा० पु० ॥ ॐ सं सुरूपा कला श्री २३
पा० पु० ॥ ॐ हं कपिला श्रीपा० पु० ॥ ॐ ळं हव्यवाहिनी श्री

पा० पु० ॥ ॐ क्षं कव्यवाहि कला श्रीपा० पु० ॥ इति कला ॥
अथ ध्यानं ॥ अनघ कला ध्यायेत् ॥ रक्तवर्णा सुशोभना
॥ रक्तांबरधरा रक्ता रक्तगंधानुलेपना ॥ १ ॥ इति दस क
ला संपूज्य ॥ तत्र सौवर्णाद्यन्यतमं मृन्मयं वा क्षालितं
अस्त्रेण धूपकलशं निधाय ॥ ॐ ह्रीं हुं वस्राउच कषाय ८
स्वाहा ॥ इत्यनेन मंत्रेण दशांगे धूपं दत्वा ॥ तस्मिन् पा
त्रे ऐं सं दीपिनी ज्वालामालिनि हुं फट् ॥ ह्रीं योनिमुद्रां वि

नस्यप्रणवेनाभिमंत्र्यअवगुंठनमुद्रयाअवगुंठ्य ॥ ॐ ऴ्रीं
२४ नमः क्ष्रं नमः हं नमः श्री नमः ॥ इतिबीजपंचकं ॥ तस्मि
न्पात्रेविन्यस्य ॥ ॐ ह्रां श्रीं स्फीं ॥ ॐ नमो भगवतीमहाल
क्ष्मीश्वरीपरधाम्नीऊर्ध्वशून्यमधोशून्यप्रकासपरका
सभासुरसोमसूर्याग्निभक्षणीआगछ २ विशविश
पात्रंग्राहाणग्राहाणप्रस्फुर २ फवौषट् ॥ इतिपात्रवि २४
घामुद्वार्य ॥ श्रीमन्महावालात्रिपुरसुंदरीकुलसंस्था

पयामिनमः ॥ तस्मिन्पात्रेसंस्थाप्य ॥ अं द्वादशाकलात्म
नेअर्कमंडलायनमः ॥ हां हिं हुं हैं हौं हः हमलवरयूं हं व
सुंप्रदसूर्यमंडलायनमः ॥ द्वादशाकलात्मनेवालात्रिपुर
सुंदर्य्यैनमः ॥ कंभंतपनिकलाश्री० ॐ खं वं तापिनीश्री०
गं फं धुम्राचिकलाश्री० ॥ ॐ घं पं यमरीचिश्री० ॥ ॐ ङं नं
ज्वालिनिश्री० ॥ ॐ चं धं श्री० ॐ छं दं सुषुम्नाकलाश्री० जं पं
भोगदाकलाश्री० झं तं विश्वकलाश्री० ॐ गं त्रं बोधिनिश्री०

ॐ ठं ॐ धारिणी कलाश्री० ठं ढं क्षमा कलाश्री० ॥ इति संपू
२५ ज्य ॥ ततो जलेन सां सीं सूं सैं सौं सः स कामप्रदे षोडश कला
स्मने सोम मंडलाय नमः ॥ श्रीं महा बाला त्रिपुरस्फुरद्याः
कलशामृताय नमः ॥ इति जलेन संपूज्य ॥ अष्टौ भैरव
अष्ट मातरा तत्र पूजयेत् ॥ इति संपूज्य ॥ षडंगानि पंच
रत्नानि संपूज्य ॥ सोमस्य षोडस्य कला पूजयेत् ॥ २ ॥ अं २५
अमृतकलायै श्री० अमानंदा कलायै श्री० इं इं पुषा कला

श्री० ॥ इं इं तुष्टी कलाश्री० ॥ उं उं पुष्टी कलाश्री० ॥ ॐ हं श्रति
कलाश्री० ॥ ॐ ॐ धृति कलाश्री० २ ॐ ॠं शशिनी कलाश्री०
॥ ॐ लृं चांद्रिका कलाश्री० ॥ ॐ लॄं कांति कलाश्री० ॥ ॐ एं ओं०
॥ ॐ ऐं श्रीं कला० ३ ॐ प्रीति कला० ॐ अंगद कला० अं पूर्णा
० अः पूर्णामृता के० ॥ मूलेन विरिक्ष अस्त्रेण प्रोक्षितेन
वकुशेनैव संताज्य ॥ कवचेनाभ्युक्त कामराजेना ऽ एक
त्म परामृत पदं नावहे नाध्याती न्निर्यं जपं सुंदरी कल

समृतीकरोतिइतिसप्तवारमावर्त्यामृतीकृत्यमंनिरुध्या
२६ वगुंठ्यअस्त्रेणसंरक्ष्यधेनुमुद्रांयोनिमुद्रांप्रदर्स्य॥इति
कलसस्थापनविधिः॥अथद्रव्यशोधनविधिः॥ॐनमः
इंकुंभेपुष्पंदत्वामंडपेत्रिकोणंविलिख्य॥ह्रोंह्रौंत्रिरिष्या
॥ॐवामदेवायवौषट्इतित्रिरिष्ट्वा॥ॐहूंपशुपतये॥
ॐअस्त्रायफट्॥ॐह्रींश्रींपरमस्वामिनिपरमाकाशशू २६
न्यवासिनिचंद्रसूर्याग्निभक्षणिपात्रंविशश्वाः॥इतित्रिः

सकृद्दारंसंपूज्य॥ॐऐंह्रींश्रींआनंदेश्वरायविद्महेसुधा
देव्यैचधीमहितन्नोर्धनारीश्वरप्रचोदयात्॥इत्यानंद
गायत्रीजपेत्॥त्रिजपित्वा॥ॐहंसःशुचिषद्वसुरंतरि
क्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥नृषद्वरसदृत
सद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत्॥इ
तिद्रव्योपरित्रिवारंपठित्वा॥ॐवांब्रह्मशापविमुक्ता
यैसुधादेव्यैनमः॥इतिदशधाजपेत्॥ॐह्रांश्रींक्रां

दसुधादेव्यै नमः कृष्णशापमोचय२ अमृतं श्रावय२ स्वा
२६ हा ॥ ॐ सूर्यमंडलसंभूते वरुणालयसंभवे ॥ आमावी
जमये देवी शुक्रसापविमोचितां ॥ देवानां प्रणवो बीजं ब्र
ह्मानंदमयो यदि तेन सत्येन देवेशि शुक्रशापप्रमुच्यतां
॥ इति प्रत्येकत्रिभिरभिमंत्र्य ॥ एकमेव परब्रह्म स्थूलसू
क्ष्ममयं ध्रुवं ॥ कचोद्भवं ब्रह्महत्यां तेन ते नाशयाम्यहं २७
॥ मूलेनाष्टधा प्रतिकामकलायां देवीमावाह्य ॥ सक

लीकृत्य दिग्बंधनं कृत्वा ॥ ह्रीं नेत्रत्रयाय वौषट् ॥ इति
दिव्यदृष्ट्या संविक्ष्य प्रसादमुद्रां योनिमुद्रां प्रदर्श्य ॥ इति द्र
व्यशुद्धिः ॥ अथ द्वितीया शोधनं ॥ मीनमुद्रादीनां सो
धनमाह ॥ ॐ य इति संशोष्य ॥ अं रं इति संदह्य ॥ ॐ वमि
ती आमृतेन प्लाव्य तस्योपरि धेनुमुद्रां प्रदर्श्य ॥ ॐ हूं इ-
त्यवगुंठ्य फडिति संप्रोक्ष्य तेषामुपरि मूलं दशधा प्रज
प्य आनेन क्रमेण सोधयेदिति ॥ ॐ प्रतद्विष्णुस्तवते

वीर्येण भृगोन भीमः कुचरो गीरिष्टाः ॥ यस्योरिषुत्रिषु
२८ द्विक्रमेण ष्वधिक्षियंति भूयानानि विश्वा इति शुद्धे शुद्धि
॥ अथमान ॥ ॐ यमिति शंषोष्य ॥ ॐ रमिति संदह्य ॥ ॐ
वमिति धेनुमुद्रया अमृतीकृत्य ॥ ॐ हूं इत्यवगुंठ्य ॥ ॐ
फडिति संप्रोक्ष्य ॥ तस्योपरि मूलं दत्त्वा संधाप्रजप्य ॥ त्र्यंबु
कं यजामहे सुगंधिं पुष्टिवर्द्धनं ॥ उर्वारुकमिव बंधना
न्मृत्योर्मुक्षीय मामृतात् ॥ इति मीनशुद्धिः ॥ अथमुद्रा

शोधनं ॥ ॐ यमिति संशोष्य ॐ रमिति संदह्य ॥ ॐ वमिति
अमृतेन प्लाव्य ॥ वमीति धेनुमुद्रया अमृती कृत्य ॥ ॐ
हूं इत्यवगुंठ्य ॥ फडिति संप्रोक्ष ॥ तस्योपरी मूलं दत्त्वा संधा
प्रजप्य ॥ त्र्यंबकमिति मंत्रेण मीनशुद्धिः अनेनक्रमेण
मुद्रा शोधयेत् ॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः
दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः
सः समीधते विष्णोर्यत्परमं पदं ॥ इति मुद्राशोधन ॥

MEMORIAL

अथ ललनाशोधन कामिय काउँ ह्रीं श्री बालात्रिपुरायैन
२४ मः ॥ इमां शक्तिं पवित्रीकुरु मामशक्तिं कुरु२ स्वाहा ॥
॥ इति सामान्यार्घजलेन संप्रोक्ष्य ॥ ततः शनैः शनैः
स्तकुरोस्याभेदेन निजमंत्रजपेत् ॥ ॐ ह्रं ह्रं ऊं हूं फ
ट् स्वाहा ॥ ॐ क्लीं श्रीं सुरतप्रीयै ॐ क्लीं श्रीं हूं फट् स्वाहा
॥ ॐ अमृते अमृतोद्भवे अमृतावर्षिणि देवी शुक्रशा २४
पमोचय२ अमृतं श्रावय२ अमृतं कुरु२ स्वाहा ॥ ॐ वि

ष्णुर्योनी कल्पयंतु त्वष्टा रूपाणी प्रवीत्रात आसिंचतु
प्रजापति र्धाता गर्भं दधातु ॥ ते गर्भं देहि सिनिवालि
गर्भं धेहि सरस्वति ॥१॥ गर्भं ते अश्विने देवाः राधत्तां
पुष्कर जस्त्रजां ॥ रूपमेवतु गोविंदं वृंदावनोत्तरामा
ह ॥ इति ललाशुद्धिः ॥ अथ पूर्वदेवमंडलं कृत्वा तथै
व संपूज्य ॥ तत्र त्रिपदिकां संस्थाप्य ॥ तस्या पूर्वे च तत्व
क्री मंडलं संपूज्य ॥ तत्र वर्णादिन्यतमं ॥ नारिकेलोद्ध

वंमहाशंखंकुर्मकपालशीलोद्भवंमुक्ताशुक्त्योद्भवंवाश्री

३० पात्रंसंस्थाप्य॥ तत्रसूर्यमंडलसंपूज्य॥ मूलविद्यायासं

पूजयेत् तनकलसमध्येभागत्रयावशेषस्यत्रिभागं

जलंपात्रांतरेणधृत्यमूलेनपात्रंसपूरयेत्॥ तत्रगं

धाष्टकंविलिप्य॥ पूर्ववत्सोममंडलंसंपूज्य॥ ग्लूंग

गनरत्नायनमः॥ ॐ३ स्लूंपातालरत्नायनमः ३ ॐख ३०

रगरत्नायनमः ३॥ ॐमर्त्यरत्नायनमः॥ इतिपंचरत्नं

॥ इतिमध्येचतुर्दिक्षुचत्रकथादित्रिरेखाद्यं हस्तातरंत्रि

कोणंविचिंत्यमूलविद्ययासंपूज्यहृदावृत्याषडंगानि

चसंपूज्यमत्स्यमुद्रयासंस्थाप्य॥ ॐ ऐंह्रींश्रीं ब्लूं स्त्रौं जुंसः

प्रभृते अमृतोद्भवे अमृतंवर्षिणि अमृतंश्रावय२स्वाहा

॥ इतित्रिवारंमन्त्रिमंत्र॥ एवारुणीजलेनमूर्त्तयेयामे

स्यैपथिदेवतायेनमः॥ इमंवलीगृह्णसर्वदोषानो

चाटयहुंफट्स्वाहा॥ यासुधासाउमादेवीयोमद्सम

हेश्वरः ॥ योगं धर्शं भवे ब्रह्मा यो मोह स जनार्दनः ॥ स्वा
२१ देतु संस्थितं सोमो फेन आनील उच्यते ॥ इच्छा शांमन्म-
थो देवो नाम्नायां बटुक भैरवः ॥ ऐं स्फ धा दे वी वि ग्रहे क्लीं
अमृते श्वरी धीमहि सौ तन्नतु शिप्र चोदयात् ॥ इति अ
भिमंत्र ॥ अखंडैकरसानंद करे परसुधात्मिके ॥ स्वच्छं
छंदः स्फुरणा मत्र निधेयकुल रूपिणी ॥ इति चतुर्वा २१
रमभिमंत्र ॥ हस क्ष मल वरयूं आनंद भैरवाय वौष

ट् ॥ सहक्षमलवरयूं आनंद भैरव्ये वौषट् ॥ इति मध्ये सं
पूज्य ॥ सहक्षमलवरयूं ॥ स्फ धा देव्ये वौषट् ॥ इत्यभिमं
त्र ॥ तदुपेरि कस्पत्वं नित्यत्येन वरूपीणी भूत्वा परामृ
ताकारमयि चित्स्फुरणं कुरु ॥ ३ ॥ इति पंच वारमभिमं
त्र ॥ अकुलस्था मृताकारे सिद्धज्ञानकरे परे ॥ अमृतं
त्वं निधेह्यस्मिन्वस्तुनि क्लिन्नरूपिणी ॥ ॐ ऐं क्लीं इति
पंचवारं मभिमंत्र रुँ ह्रौं हंसः सोहं स्वाहा ॥ इति परं

ज्योतिःपरंज्योतिषे॥ॐमितिपरकमलयाहसंइत्यज-
३२ पयासपूर्णमात्रकयासकृदभिमंत्र्यसकलोऽज्ञानिरा
भिः॥मूलेनसप्तवारमभिमंत्र्य॥ कोम्मकलयावारत्र
यमभिमंत्र्य॥पुष्पाद्यैरभीपुज्यदिव्यामृतंभावयेत्॥
इतिविशेषार्घ्यविधिः॥ततःसंषंत्रिपदिकापूजावि
धाय॥एकंतुसामान्यर्घ्यपात्रं॥१॥ततपरंभैरवपा ३२
त्रं॥२॥ततःपरंभोगपात्रं३॥ततःपरंयोगिनिपात्रं

४॥ततःपरंगुरुपात्रं५॥ततःपरंसाधिकपात्रं६॥त
तःपरंआत्मपात्रं७॥ततःपरंशक्तिपात्रं८॥एवंमनु
क्रमेणपात्राणिसंस्थाप्यविशेषतः॥संपूज्यपुरमादौ
घृतेनविशेषार्घ्यबिंदुंविक्षिप्यततस्तेनात्मानंपूजासा
धनंचप्रोक्षयेत्॥ततःस्वगुरुंनाथंयावत्परमनाथादि
पादुकासामान्यपात्रंद्रव्येणसंपूज्य॥संतर्प्यस्वगुरुंचत्रि
स्तर्पयेत्॥ततःसमस्तमगदगुह्येतिसमष्टिमंत्रेणपु

ष्पांजलिंदत्वा॥आत्मानंदेवताभिर्न्नदेवीभाव्यगंधा
२२ दिभिरलंकृत्यमूलेनसिरसिवारत्रयंपूज्यसंतर्प्यनि
त्यामंत्रैनित्यास्तर्पयेत्॥अत्रैवतावत्कर्त्तुमसमर्थस
दासामान्यपात्रादिभोगपात्रांतंपात्रचतुष्टयंस्थापये
त्॥तावत्कर्त्तुमसमर्थःसदासामान्यपात्रंतमासाद
येत्॥अत्रविशेषः॥इतिद्विवचनंतदर्ध्यस्तुगकंमयाद २३
यंतव्यः॥विशेषाभावेघृतेनवामधुनावापयावागो

तक्रेणवाद्रकेनश्चूटयापूरयेत्॥इतिअर्घ्यस्थापनादि
पात्रस्थापनविधिः॥अथश्रीचक्रस्याधः॥सिंहास
नध्यात्वातदधः॥त्वारुपार्युपरिपूजयेत्॥ॐमंमंडुका
यनमः॥ॐमूलप्रकृत्यैनमः॥ॐआधारशक्त्यैनमः
॥ॐकूर्मायनमः॥ॐअनंतायैनमः॥ॐवाराहायन
मः॥ॐपृथिव्यैनमः॥ॐतत्क्षामृतार्णवायनमः॥ॐर
त्नद्वीपायनमः॥ॐस्वर्णपर्वतायनमः॥ॐनंदपर्युप

रिनंदमोघायनमः ॥ॐकल्पपादपेभ्योनमः ॥ॐरत्न
३४ भूमिकायैनमः ॥ ॐश्रीरत्नमंदिरायेनमः ॥ॐरत्नवे
दिकायैनमः ॥ॐश्वेतछत्रायैनमः ॥ॐरत्नसिंहासना
यैनमः ॥दक्षिणेततोआग्न्यादिपिठागेषु धर्मायनमः
ज्ञानायैनमः ॥ वैराग्यायनमः ॥ ऐश्वर्यायनमः ॥मध्ये
अधर्मायनमः ॥आज्ञानायनमः ॥ अवैराग्यायनमः
अनैश्वर्येनमः ॥ ततोमध्येकंदायनमः ॥ज्ञानात्मा

DR. ... MEMORIAL

नायनमः ॥पद्मायनमः ॥ पत्रेभ्योनमः ॥केसरेभ्यो
नमः ॥ऊर्ध्वकर्णिकायनमः ॥अग्निमंडलायनमः ॥
सोममंडलायनमः ॥सत्वायनमः ॥रजसेभ्योनमः
॥तमसेभ्योनमः ॥आत्मनेनमः ॥परमात्मनेनमः
ज्ञानात्मनेनमः ॥मायातत्वात्मनेनमः ॥कालतत्वा
त्मनेनमः विद्यातत्वात्मनेनमः ॥अग्नेयादिब्रह्मणे
पृथिव्याधिपतयेनमः ॥विष्णवेअपामधिपतयेन

मः॥रुद्रायतेजोधिपतयेनमः॥इश्वरायवाचाधिपत
३५ येनमः॥सुधार्णववासनायनमः॥चक्रासनायनमः
॥साध्यसिद्धासनायनमः॥ततपीठेपूर्वादिश्री।पूर्वेइ
छायेनमः॥ज्ञानायैनमः॥क्रियायैनमः॥कामन्यैन
मः॥कामदायिन्यैनमः॥रत्यैनमः॥रतीप्रियायनमः
॥नंदायैनमः॥मनोन्मन्यैनमः॥मध्येहसौसदासी ३५
वमहाप्रेतपद्मासनायन०॥इत्यासनंसंपूज्यमूलेन

श्रीबालात्रिपूराचक्रे॥पीठदेवताभ्योनमः॥इतिपुष्पां
जलपुनः कराभ्यांपुष्पांजलिगृहित्वामूलाधारातकुंड
लीनीहृदयेअष्टदलेरूपंकजेसमानीयवह्न्यासा
पुटेनआवाहयेत॥महापद्मवनातस्थेकरुणानंदवि
ग्रहे॥सर्वभूतंहितेमातरेह्येहिपरमेश्वरी॥मूलेनश्री
महात्रामहाविद्येसकलपरिवारसहितेअस्मिन्मंडले
आगछ२सानिध्यंकुरु२स्वाहा॥देवेसिभक्तिसुलभे

परिवारसमन्विते ॥ यावत्वां पूजयिष्यामि तावद्देवि इहावह
३५ इति पुष्पांजलिं क्षिपेत् ॥ अथ ध्यानं ॥ रक्तांबराचंद्रकला
वतंसं समुद्यदादित्यनिभां त्रिनेत्रां ॥ विद्याक्षमालाभय
दानहस्तां ध्यायामि बालामरुणांबुजस्तां ॥ १ ॥ कर्पूरता
टंकमुखारविंदां माणिक्यमंजीरपदारविंदां ॥ युवाभि
राघूर्णितलोचनानां ॥ बालां भजे ह्यूलतमालमालां ॥ २ ३५
॥ इति ध्यात्वा ॥ ततः आवाहनादिमुद्राः प्रदर्शयेत् ॥ आ

बाहनं संस्थापनं ॥ संनिधापनं ॥ संनिरोधनं ॥ अव
गुंठनं ॥ सन्मुखीकरणं सकलीकरणं ॥ परमीकर
णं ॥ अमृतीकरणं १० ॥ ततो विशेषमुद्रा ॥ वरदा अ
भयदा पुस्तकं ॥ अक्षमाला अंकुश ॥ पास ॥ चाप ॥
बाण ॥ कपाल कमल १० ॥ ततो षोडशोपचारं कृत्वा
॥ मूलेन श्री बालात्रिपुरायै एषपाद्यं नमः ॥ पादयोः
मूले श्री पा० एतदाचमनीयं नमः ॥ मुखे मूलं श्री पा०

॥इदमर्घ्यस्वाहाः स्तीरस्तीमूलंश्रीपा० एकतेमफपर्के
३८ स्वधामुखेमूलंश्रीपा०॥इदंस्नानीयंनमः॥सर्वांगेषु
स्त्रंगहाणेतिवस्त्रंदत्वा॥अभूषणं॥छत्रचामरं२स
कलराजोपचारान्कृत्वा॥मूलंश्रीबालात्रिपुरस्के दयं
श्री०॥इमंमंत्रत्रिवारंसंपूज्य॥मूलेनधुपदिपनैवेद्यो
आरार्तिकंकृत्वाप्रणम्पयोनिंमुद्रांप्रदर्श्य॥प्रार्थनाकृ ३८
त्वा॥सविन्मयेपरेदेवीपरामृतरसप्रिये॥अनुज्ञांत्रि

पुरेदेहिपरिवाराऽर्चनार्चने॥इत्याज्ञांलब्ध्वाआवरणे
देवतांपूजयेत्॥आदौत्रिकोणेगुरुपूजाश्रीदक्षभा
गे॥ॐपरप्रकाशानंदनाथश्रीपादुकांपूजयामितर्पया
मिनमः॥परमेशानंदनाथश्रीपा०॥ॐसिर्वासिवा
नंदनाथश्रीपा०॥ॐअमृतानंदनाथश्रीपा०॥इति
समदिव्यौघःसंपूज्य॥तत्रत्रिकोणान्तेईशानायश्री
पादुकां०॥ततुरुषांश्री०अघोरायश्रीपा०॥ॐवाम

देवायश्री पा० ॥ ॐ सद्योजातायश्री ॥ इति पंचसिद्धौपा ॥
२८ तत्र त्रिकोणेश्री वामभागे ॐ श्री गुरुभ्यो नमःश्री पा० ॥ श्री
परमगुरुभ्यो नमः श्री पा० ॥ ॐ परमेष्ठिगुरुभ्यो नमः श्री
० ॥ ॐ परात्परगुरुभ्यो नमः श्री० ॥ ॐ परात्परतरगुरु-
भ्यो नमः श्री० ॥ इति मानवाघाः ॥ अथ षडंगपूजा ॥
श्री अग्नये ॥ ॐ ऐं हृदयांग देवतायै श्री० ॥ श्री इशाने १ २८
क्लीं सिरसांग देवतायै श्री० ॥ श्री निरुते सौं शिखांग देव

तायै श्री० ॥ श्री वायव्ये ऐं कवचांग देवतायै श्री० ४ ॥ श्री म
ध्ये क्लीं नेत्रत्रयांग देवतायै श्री पा० ५ ॥ चतुर्दिक्षु सौः अ
स्त्रांग देवतायैः श्री पा० ६ ॥ अथ आवरणपूजा ॥ ॐ क्लीं
श्री त्रिकोणे पद्मासनाय नमः श्री० ॥ त्रिकोणे क्लीं श्री रति
देवी श्री पा० ॥ ॐ उत्तर कोणे श्री प्रीति देवी श्री पा० ॥ श्री द
क्षिण कोणे क्लीं श्री मनोभवा देवी श्री पा० ॥ ॐ उत्तर कोणे
द्रां क्षोभण बाण देवी श्री पा० ॥ ॐ द्रां द्रावण बाण देवि

श्री०॥ श्रीदक्षिणकोणे क्लीं आकर्षणबाणदेवि श्रीपा०
२९ ब्लूं वस्छ याणदेवी श्री०॥ कोणाग्रे सः उन्मादबाणदेवी
श्री०॥ इतिबाणः॥ दक्षिणकोणे क्लीं कारप्रदेव श्रीपा०॥
क्लीं मन्मथदेवः श्रीपा० श्री वामकोणे ऐं कंदर्पदेव श्रीपा०
क्लूं मकरध्वजदेव श्रीपा०॥ कोणाग्नि श्री मीनकेतनदेव
श्रीपा०॥ इति त्रिकोणपद्मसायुधाः॥ सावहनास्सपरिवा
राः सांगा पूजितास्तर्पितासंतु मां रक्षंतु नमः पुष्पांज

लिं दद्यात्॥ इति प्रथमावरणं॥ अष्टकोणपद्माय नमः॥
श्रीपूर्वादिः प्रदक्षिणेन नमः॥ क्लीं सुभगायै श्रीपा०॥ क्लीं
भगायै श्रीपा०॥ क्लीं भगसर्पिण्यै श्रीपा०॥ क्लीं भगमालि
न्यै श्रीपा०॥ क्लीं अनगानगारगारै श्री०॥ क्लीं अनंगकु
सुमायै श्रीपा०॥ क्लीं अनंगमेखलायै श्रीपा०॥ क्लीं अनं
गमदनायै श्रीपादु०॥ इत्यष्टकोणपद्मे सायुधास्सवाह
नास्सपरिवाराः सांगपूजितास्तर्पिताः संतु मां रक्षंतु स्या

हेतिमूलेन पुष्पांजलिं दत्वा ॥ इति द्वितीयावरणं ॥ अष्टद
४० लपत्रासनाय नमः ॥ श्री पूर्वादितः आं ब्रह्मण्यै नमः ॥
श्री पा० ॥ ईं माहेश्वर्यै नमः श्री पा० पु० न० ॥ ऊं कौमार्यै न
मः श्री पा० ॥ ॠं वैष्णव्यै नमः श्री पा० ॡं वाराह्यै० श्री पा०
॥ ऐं ब्राह्मण्यै नमः श्री पा० ओं चामुंडायै श्री पा० ॥ अः महा
लक्ष्म्यै नमः श्री पा० ॥ इत्यष्टदलपत्रे सायुधा सवाहना ४०
सपरिवारा सांगा पूजिता स्तर्पिताः संतु मां रक्षंतु स्वाहे

तिमूलेन पुष्पांजलिं दत्वा ॥ इति तृतीयावरणं दलेअष्टौ
भैरवाय नमः ॥ असितांगभैरवाय नमः श्री पा० ॥ रुरुभै
रवाय श्री पा० चंडभैरवाय श्री पा० क्रोधभैरवाय श्री पा०
॥ उन्मत्तभैरवाय श्री पा० ॥ कपालभैरवाय श्री पा० भीष
णभैरवाय श्री पा० ॥ संहारभैरवाय श्री० ॥ इति दले सायु
धा सवाहना सपरिवारा सांगा पूजिता स्तर्पिताः संतु मां
रक्षंतु स्वाहेति पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणं ॥ ४

४१ अथ ग्रंथिपद्मे ॥ श्री पूर्वादि प्रादक्षिणे दलाग्रे ॥ कामरूपीठा
यश्रीपा० ॥ महालयंश्रीपा० ॥ कलिंगपिठायश्रीपा० का
लांतकपीठायश्रीपा० ॥ चौहारपिठायश्री० ॥ जालंधरपी
ठायश्री० ॥ उड्डियानपिठायश्री० ॥ देवकूटपिठायश्रीपा०
॥ इति ग्रंथिस्थाने पश्चिमादिक्रमात् संपूज्य ॥ सायुधा
सवाहनाः सांगाः सपरिवाराः पूजिताः तर्पिताः संतु मां र ४१
क्षंतु ॥ इति पंचमावर्णं ॥ ५ ॥ शूलाष्टकपद्मे ततः प

श्चिमादि हेतुक भैरवायश्रीपा० वेताल भैरवायश्रीपा०
त्रिपुरांतकभैरवायश्रीपा० ॥ अग्निजिह्व भैरवायश्री०
कालांतकभैरवायश्री० ॥ कपालिनि भैरवायश्री०
॥ एकपाद भैरवायश्री० ॥ भीमरूप भैरवायश्री०
॥ अधःरूह भैरवायश्री० ॥ ऊर्ध्व हाटकेश्वर भै
रवायश्री० ॥ इत्यष्टशूलपद्मे सायुधाः सवाहनाः ॥
सांगाः सपरिवाराः सुपूजिताः तर्पिताः संतु मां र

त्संतु नमः स्वाहेति पुष्पांजलिं दत्वा ॥ इति पद्माव
४२ रणं ॥ ६ ॥ चतुरस्त्रे स्वदिक्षु पूर्वादि पूर्वेंद्राय सुराधि
पतये वज्रहस्ताय ऐरावतवाहनाय सशक्तिकाय
श्री० ॥ अग्नये अग्ने तेजोधिपतये शक्तिहस्ता ।
य मेषवाहनाय सशक्तिकाय श्रीपा० ॥ दक्षि
णे यं यमाय प्रेताधिपतये दंडहस्ताय महिषवाह ४२
नाय सशक्तिकाय श्री० ॥ नैऋते क्षं नैऋत्ये र ।

क्षादिपतये येषहस्ताय नरवाहनाय सशक्तिकाय श्री
पा० ॥ पश्चिमे वं वरुणाय जलाधिपतये पाशहस्ताय
मकरवाहनाय सशक्तिकाय श्रीपा० ॥ वायव्ये यं वाय
वे प्राणाधिपतये अंकुशहस्ताय मृगवाहनाय सशक्ति
काय श्री० ॥ उत्तरे कं कुबेराय धनाधिपतये गदाहस्ताय
अश्ववाहनाय सशक्तिकाय श्री० ॥ ईशाने यं भूताधिपत
ये शूलहस्ताय वृषभवाहनाय सशक्तिकाय श्री० ॥

॥ऊर्ध्वे ॐ आं ब्रह्मणे लोकाधिपतये पद्महस्ताय हंसवाहना
४२ य सशक्तिकाय श्री पा० ॥ अधः ह्रीं वीं स्मवे पृथिव्याधि
पतये चक्रहस्ताय गरुड वाहनाय सशक्तिकाय श्री० पू:
जस्ता: संतु मां रक्षन्तु नमः स्वाहेति पुष्पांजलिं दत्वाइ
ति सप्तमावरणं ॥७॥ श्री पूर्वे बटुकाय नमः श्री पा० ॥ द
क्षिणे यां योगिनिभ्यो श्री पा० ॥ पश्चिमे क्षें क्षेत्रपालाय ॥ ४३
श्री पा० ॥ उत्तरे गं गणपतिभ्यो नमः श्री पा० ॥ वायव्ये वं

वसुभ्यो नमः श्री पा० ॥ ईशाने मं द्वादशादित्येभ्यो नमः श्री
पा० ॥ अग्नये ह्रौं एकादशरुद्रेभ्यो श्री० नैऋत्ये सर्वेभ्यो भू
तेभ्यश्च श्री पा० ॥ इति चत्वेसं पूज्य ॥ इति आवरण पूजा
समाप्तः ॥ घंटां संपूज्य ॥ भगवायततो धूपं समर्प्य वन
स्पत्येति मंत्रेण मूलेन संगायै सपरिवारायै सायुधायै स
वाहनै भगवत्यै श्री बालात्रिपुरासुंदरी धूपं निवेदया
मि ततो दीपं ॥ सुप्रकाशो महादीपं सर्वत्र तिमिरापहं

४८

सबाह्याभ्यंतरंज्योतिर्दीपोयंप्रतिगृह्यतां॥मूलंतिसां
गा०॥दिपंनीवेदयामीततोनैवेद्यंफडितिमंत्रेणजलि
संप्रोक्ष्य॥चक्रमुद्रांप्रदर्श्य॥हेमपात्रंगतंदिव्यंपरमान्नं
दसंस्कृतं॥पंचधाषड्रसोपेतंगृहाणत्रिपुरेश्वरी॥१
मूलांतेसांगायैनैवेद्यंसर्वदेवदेवेशीसर्वतृप्तीकरंपरं
अखंडानंदपूर्णेगृहाणजलमुत्तमं॥ततोतांबूलंपा
ताभरससंभूतंकपूरादिसुवासितं॥मयानिवेदितं

MEMORIAL

देवीतांबूलंप्रतिगृह्यतां॥मूलांतसांगायैतांबूलं॥त
तोनित्यहोमः॥मूलेनपंचप्राणाहुतिंदद्यात्॥ॐप्राणा
यस्वाहा॥अपानायस्वाहा॥ॐव्यानायस्वाहा॥ॐउदा
नायस्वाहा॥ॐसमानायस्वाहा॥ततःषडंगेषडाहुति
दद्यात्॥अथवटुकदानबलि॥श्रीचक्रस्यईशानको
नेत्रिकोणवृत्तचतुरस्रंचविधाय॥बटुकायनमःइति
संपूज्यततोबलिमंत्रः॥एह्येहिदेवीपुत्रबटुकनाथ

कपिलजटाभारत्रिभासुरत्रिनेत्रज्वालामुखसर्वविघ्नां
२५ नाशयसर्वोपचारसहितमिदंबलिंगृह्ण गृह्ण स्वाहाः
वामांगुष्ठानामिकामुत्सृज्य बलीं भक्ष्मां रक्ष ॥ अग्नि
कोणे त्रिकोणवृत्तचतुरस्त्रं कृत्वा ॥ यां योगिनिभ्यो नमः
॥ पूजा ऊर्ध्वं ब्रह्मांडवासिदिविगगणतले भूतले निष्कले
वा पाताले चानले वा सलिलपवनयोयत्र कुत्र स्थितं
ता क्षेत्रे पीठोपपीठादिषु चकृतपदा धूपदीपादिकेन

प्रीता देव्याः सदा नः शुभबलिविधिना पातु वीरेंद्रवंद्या
यां योगिनीभ्यो हुं फट् स्वाहाः ॥ वामांगुष्ठमध्यमानामि
कामुत्सृज्य ॥ ततो नैरृत्ये त्रिकोणवृत्तचतुरस्त्रं ॥ क्षं क्षे
त्रपालाय नमः ॥ क्षां क्षीं क्षूं क्षैं क्षैं क्षौं क्षः स्थानक्षेत्र
पालाय धूपदीपसहितं बलिं गृहाण स्व ॥ वामांगुष्ठाना
मिकाभ्यां उत्सृजेत् ॥ वायव्ये त्रिकोणवृत्तं चतुरस्त्रं गंग
णपतये क्यो नमः ॥ गां गिं गूं गैं गौं गः गणपतये वरद

सर्वजनमेवश्यमानीय बलिं गृह्ण गृह्ण स्वाहा ॥ गजतुंड
४६ मुद्रया बलिं मुत्सृजेत् ॥ ततः स्ववामे चतुरस्रं कृत्वा तत्र
साधारण बलिं स्थाप्य ॥ मूलेनाभिमंत्र्य ॥ ह्रीं व्यापकमंड
लायऽ सर्वविघ्नकृद्भ्यः सर्वेभ्यो भूतेभ्यो नमः स्वाहा ॥
एष बलिः सर्वेभ्यो भूतेनमः स्वाहा ॥ इति तत्वमुद्रयोत्
सृज्य इति बटुक पंच बलि विधिः ॥ ततो आरार्त्तिक प्र ४६
ज्वाल्य ॥ ह्रीं श्रीं ग्लूं स्त्रौं स्त्रं क्रूं श्रीं क्रूं इत्यभिमंत्र्य मूलेनाभि

मंत्र्य संप्रोक्ष्य ॥ समस्तचक्रचक्रेशियुते देवी नमास्म
के आरार्त्तिकमिदं देवी गृह्ण तु त्रिपुरेश्वरी श्रीत्रिपुरेम
माभिष्टसिद्धये नैवेद्ययामि ॥ मूलांते आरार्त्तिकं कृत्वा
॥ ततो ऋष्यादिषडंगं कृत्वा ॥ ध्यानं ॥ अष्टोत्तरशतंमं
त्रजपं कृत्वा जपसंकल्पं ॥ गुह्यातिगुह्यगोप्त्री त्वं गृ
हाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देवी त्वत्प्रसादात्
सुरेश्वरी ॥ १ ॥ जपसमर्पं ॥ स्तुति कुर्यात् ॥ किंकिं दुखं

दनुजदलिनी क्षीयते न स्मृतायां काका सिद्धिः सुरवर
६७ नुते प्राप्यते ॥ नार्चितायां ॥ का का मूर्त्ति कूलकमलिनी
प्राप्यते न स्तुतायां ॥ कं कं योग त्वयि विरचितं नुते चित्तमा
त्वाविताय ॥१॥ भक्तस्य प्रेरिता पूजा रक्तस्य परमेश्व
री ॥ वाग्वादिनी महासिद्धि देहि त्रिपुरसुंदरी ३ ॥ परमा
नंदसंदोहप्रमोदपरनिर्भरः ॥ दुःखत्रयपरिमात्ता ४७
नवदनं त्राहि मां शिवे ४ ॥ सवृब्रह्मभवे स्वस्थे देवी ।

त्रिपुरसुंदरी ॥ यथाशक्त्या जपं पूजां गृहाण मदनुग्रहा
त् ॥५॥ द्रव्यहीनं क्रियाहीनं मंत्रहीनं च यद्भवेत् ॥ तत्
सर्वं कृपया देवी क्षमस्व परमेश्वरी ॥ ६ ॥ इति पद्धति
समाप्तः ॥ ॥ॐ आदौ शिवगुरोधक्ते पश्चाच्छीशः
प्रकीर्तितं ॥ ततो गुरुः समाख्यातो विष्णुलोकः पीता
महः ॥१॥ सनकश्च सनंदश्च सनातनततः परं ॥
सनत्कुमारो रैवत दत्तात्रेयोस्त ततः परं ॥२॥ व्यासः

श्रुकोमहानंदःश्चंडेकेशततःपरं॥महामंगलयोगीशो
४८ परानंदस्ततःपरं॥३॥विश्वनाथमहानंदश्चिदानंदस्त
तःपरं॥शंकरश्चंद्रचूडश्चज्येष्टनाथततःपरं॥४॥वि
द्यारंभोमहाकालःकुलंतस्यप्रकीर्तिताः॥एतानगुरु
सहस्त्रारेसम्यक्‌भ्यर्चविचिंतयेत्॥५॥इतिकुलगुरुः
॥अथगुरुपरंपराउच्यार॥आदौवेदांताचार्य॥१॥द्वि ४८
तीयब्रह्माचार्य२॥तृतीयविष्णवाचार्य३॥चतुर्थरुद्रा

चार्य४॥वशिष्टपंचमाचार्य५॥शक्तिषष्टाचार्य६पा
राशरसप्तमाचार्य७॥व्यासाष्टमाचार्य८॥शुकनवमा
चार्य९गौडगोविंददशमाचार्य॥१०॥एकादशश्रीशं
कराचार्य॥११॥सत्ययुगमध्येआचार्य३ब्रह्माविष्णुरु
द्रत्रेतायुगेआचार्य३वशिष्टशक्तिपाराशर॥द्वापारे
आचार्य३॥व्यासशुकदेव॥कलियुगेआचार्य३गौड
गोविंदश्रीशंकराचार्यशंकराचार्यस्यचत्वारिशिष्य

१ प्रथमस्वरूपाचार्यः १॥ द्वितीयपद्माचार्यः २॥ तृतीयन
४९ रात्रोटकाचार्य ३॥ चतुर्थपृथ्वि धराचार्यः ४॥ पृथ्विधरा
चार्यस्य शिष्य ५॥ ब्रह्मचैतन्य १ सरस्वति २ भारति ३ पुरी
४ ब्रह्मचैतन्यस्य शिवचैतन्य॥ शिवचैतन्यस्य आनंद
चैतन्य आनंदचैतन्यस्य देवचैतन्य देवचैतन्यस्य ज
नार्दनचैतन्य दक्षणाम्नाय श्रृंगेरिमठ भूरवार सांप्रदा ४९
य॥ सरस्वति भारथि पुरी पद रामेश्वर क्षेत्र आदिवारदे

वता कामाक्षा देवी श्रृंगी ऋषी तुंगभद्रा तीर्थ जनार्दनचै
तन्य ब्रह्मचारी गुरु त्रयपादुका शिरसि गुरु परमगुरु प
रात्परगुरु मूलविद्या यालदित्रि वारं॥ अथ देहादि व्यवा
स्था॥ अथ स्थूलदेह अं १५॥ लोहितवर्ण २ साढे त्रिहस्त
परीमाण ३ पृथ्वी आप तेज वायु आकाश ४ वाक्पाणिपा
द पायु उपस्थ ५ श्रोत्र त्वक् चक्षु जिह्वा घ्राण ६ रजोगु
ण ७ जागद वस्था ८ अकार सहित ब्रह्मदेवत ९ वेश्य

रिवाणिविराट १० क्रियाशक्ति ११ अन्नमयकोश ॥ सूक्ष्म
५० देह ॥ कं २४ ॥ १ पाडुरवर्ण २ अंगुष्ठप्रमाण ३ प्राणापान
व्यानोदानसमान ४ शब्दस्पर्शरूपरसगंध ५ वक्कव्या
दानगमनविसर्गानंद ६ सत्वगुण ७ उकारसहित ८
विष्णुदेवत ९ स्वप्नावस्था १० मध्यमावाणी ११ इच्छाश
क्तिमनोमयकोस ॥ लिंगदेहे ॥ श्रीमद्भैरवश्रेश्वरप्रविल ५०
सच्चंद्रामृतंप्लावितं क्षेत्राधीश्वरयोगिनीगणमहासि

द्धैः समाराधितं आनंदागमकं महास्मकमिदं साक्षात्त्रि
खंडामृतं ॥ वंदे श्रीप्रथमं करांबुजगतं पात्रं विशुद्धिप्र
दं ॥ ऐं आत्मतत्त्वाय स्थूलदेहं शोधयामि जुहोमि जुषस्व
जुषध्वं स्वामभिके भ्यः अज्ञां गृहित्वा प्रस्फुरत्तरं दत्वा कु
लकुंडलनी जिह्वाग्रे मानी ॥ १ ॥ हैमं सिंदूरसावहं दधि
तयादत्तं च प्रेमादिभिः ॥ किंचिच्चंचलरक्तपंकजदृशा
मानंदमाहेक्षितं वामेसांद्रविशुद्धिशुद्धकवलं पाणो

मह्
विधायात्मकं ॥ वंदे पात्रं द्वितीयमधुनानंदैकसंवर्द्धनं
५१ स्त्रीं विद्यातत्वायसूक्ष्मदेहे सोधायामी जुहोमि जुषस्व
परमामृतं जुषध्वं ॥२॥ मकारसहितं वर्तुलं नीलवर्णं
आत्मसिकुसुमरूपमानं मसुरीकायां तमोगुण ईश्वर
देवतं पत्रपंतिवाणि ज्ञानमयकोत्रीसुषुम्णावस्थाज्ञा
नशक्तिः सर्वाम्नायसर्वाम्नायकलाकलापकलितं ५१
कौतुहलो द्योतितं ॥ चंद्रो इंद्र महेंद्र शंभु चरण ब्रह्मा

दिभिः शोधितं ॥ ध्यातं देवगणै पदं मुनिगणै मोक्षार्थि
भिः सर्वदा ॥ वंदे पात्रमहं तृतीयमधुनास्यात्मावबोध
क्षमं ॥ सौः शिवतत्वायकारणदेहं शोधयामी जुहोमि
जुषष्व परमामृतं जुषध्वं ॥३॥ तूर्यावस्थाब्रह्मरूपके
वलचैतन्य अहमस्मि ब्रह्माहमस्मि सर्वं खल्विदं ब्र
ह्मपरावाचा आनंदमयकोशः सर्वशक्तिः सर्वगतदे
ह ॥ सर्वमानं सर्ववर्णं आईमात्रा आत्मैवेदं जगत्

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सर्वं॥ मद्यं मीनरसा च हं हरिहर ब्रह्मादिभिः पूरितं मु
५२ द्रामैथुनधर्मकर्मनिरतं ज्ञानामृते राश्रयं॥ आचार्या
र्चितमष्टभैरवकुलं मांसेन चाच्छादितं पायात्पंचमकारतत्त्वनिलयं पात्रं चतुर्थं नमः ५॥ ऐं क्लीं सौं महाकारण देहं शोधयामि जुहोमि जुषस्व परमामृतं जुषध्वं॥ इति संपूर्णं इदं पुस्तकं रामचंद्रेण लिखितं॥ अ ५२
थ संख्या ग्रंथ ५१८ संवत् १९१२ नलनाम संवत्सरे